श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रयोदशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रयोदशं दशकम् ॥

## हिरण्याक्षवधवर्णनम्

हिरण्याक्षं तावद्वरद भवदन्वेषणपरं
    चरन्तं सांवर्ते पयसि निजजङ्घापरिमिते।
भवद्भक्तो गत्वा कपटपटुधीर्नारदमुनिः
    शनैरूचे नन्दन् दनुजमपि निन्दंस्तव बलम् ॥ **13.1** ॥

स मायावी विष्णुर्हरति भवदीयां वसुमतीं
    प्रभो कष्टं कष्टं किमिदमिति तेनाभिगदितः।
नदन् क्वासौ क्वासाविति स मुनिना दर्शितपथो
    भवन्तं सम्प्रापद्धरणिधरमुद्यन्तमुदकात् ॥ **13.2** ॥

अहो आरण्योऽयं मृग इति हसन्तं बहुतरै -
    र्दुरुक्तैर्विध्यन्तं दितिसुतमवज्ञाय भगवन्।
महीं दृष्ट्वा दंष्ट्राशिरसि चकितां स्वेन महसा
    पयोधावाधाय प्रसभमुदयुङ्क्था मृधविधौ ॥ **13.3** ॥

गदापाणौ दैत्ये त्वमपि हि गृहीतोन्नतगदो
    नियुद्धेन क्रीडन् घटघटरवोद्घुष्टवियता।
रणालोकौत्सुक्यान्मिलति सुरसङ्घे द्रुतममुं
    निरुन्ध्यास्सन्ध्यातः प्रथममिति धात्रा जगदिषे ॥ **13.4** ॥

गदोन्मर्दे तस्मिंस्तव खलु गदायां दितिभुवो
    गदाघाताद्भूमौ झटिति पतितायामहह ! भोः !।

मृदुस्मेरास्यस्त्वं दनुजकुलनिर्मूलनचणं
    महाचक्रं स्मृत्वा करभुवि दधानो रुरुचिषे ॥ **13.5** ॥

ततः शूलं कालप्रतिमरुषि दैत्ये विसृजति
    त्वयि छिन्दत्येनत् करकलितचक्रप्रहरणात्।
समारुष्टो मुष्ट्या स खलु वितुदंस्त्वां समतनोत्
    गलन्माये मायास्त्वयि किल जगन्मोहनकरीः ॥ **13.6** ॥

भवच्चक्रज्योतिष्कणलवनिपातेन विधुते
    ततो मायाचक्रे विततघनरोषान्धमनसम्।
गरिष्ठाभिर्मुष्टिप्रहृतिभिरभिघ्नन्तमसुरं
    स्वपादाङ्गुष्ठेन श्रवणपदमूले निरवधीः ॥ **13.7** ॥

महाकायस्सोऽयं तव चरणपातप्रमथितो
    गलद्रक्तो वक्त्रादपतदृषिभिः श्लाघितहतिः।
तदा त्वामुद्दामप्रमदभरविद्योतिहृदया
    मुनीन्द्रास्सान्द्राभिः स्तुतिभिरनुवन्नध्वरतनुम् ॥ **13.8** ॥

त्वचि छन्दो रोमस्वपि कुशगणश्चक्षुषि घृतं
    चतुर्होतारोऽङ्घ्रौ स्रुगपि वदने चोदर इडा।
ग्रहा जिह्वायां ते परपुरुष कर्णे च चमसा
    विभो सोमो वीर्यं वरद गलदेशेऽप्युपसदः ॥ **13.9** ॥

मुनीन्द्रैरित्यादिस्तवनमुखरैर्मोदितमना
    महीयस्या मूर्त्या विमलतरकीर्त्या च विलसन्।
स्वधिष्ण्यं सम्प्राप्तः सुखरसविहारी मधुरिपो
    निरुन्ध्या रोगं मे सकलमपि वातालयपते ॥ **13.10** ॥

॥ इति श्रीमन्नारायणीये त्रयोदशं दशकं समाप्तम् ॥